International Journal of Professional Development
Vol.11,No.1,Jan-June 2022 ISSN: 2277-517X (Print), 2279-0659 (Online
Impact Factor 3.148(IFSIJ)

# गृहोत्थाने नियोजने च संस्कृतविदुषीणां योगदानम्

**समीक्षा**
वेदवेदाङ्गसंकायान्तर्गत धर्मशास्त्र विभागः
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, कुतुबसंस्थानिकक्षेत्रम्, नवदेहली ११००१६

पत्रेऽस्मिन् सामान्यतया साम्प्रतिकसमाजस्य समान्यगृहस्य प्रबन्धे संस्कृतविदुषीणां का भूमिका भवति इति विचार्य्यते। अधुना गृहं किमिति जिज्ञासा जायते, तर्हि 'न गृहं गृहमित्याहुः गृहणी गृहमुच्यते' अर्थात् गृहणीं विना गृहं गृहं नोच्यते। अनेन वयं ज्ञास्यामः यत् गृहस्य निर्माणाय नार्याः महती भूमिका स्वीक्रियते। वचनम् अपि अस्ति – यदि एका नारी शिक्षिता भवति तर्हि सा गृहत्रयेन शिक्षितः करोति। न केवलं गृहस्य निर्माणाय नार्याः भूमिका स्वीक्रियते, अपि च समाजस्य निर्माणाय नार्याः भूमिका अद्वितीया भवति। भारतीयगृहव्यवस्था पूर्णतः स्त्रियामाश्रिता एव, सा परिवारे एका पुत्री, भगिनी, माता च अस्ति। भारतीयदर्शने स्त्रीः प्रकृतिसमं दृश्यते। वैदिककाले स्त्रियः न केवलं वेदाध्ययनं कुर्वन्ति स्म अपितु वैदिकमन्त्राणां साक्षात्कारम् अपि कुर्वन्ति स्म। उर्वशी, घोषा, लोपामुद्रा, विश्ववारा, सूर्या इत्याद्येकविंशतीनाम् ऋषिकानां मन्त्राः ऋग्वेद-संहितायाम् सङ्कलितम्स्ति। अथ च न केवलं शास्त्रज्ञाने अपितु शस्त्रज्ञाने अपि स्त्रियः रुचिं स्वीकुर्वन्ति स्म। कन्यायाः स्वयंवरस्य अधिकारो अपि आसीत्। अनेन वयं ज्ञातुं शक्नुमः यत् जीवनस्य प्रत्येकस्मिन् क्षेत्रे नारीणां गतिरस्ति, येन सत्यमिदं तथ्यं यत् सा सुकोमला बालिका रूपेण तु जायते परञ्च तस्य जीवनं न तावत् सुकोमलम्। सा तु कन्यारूपादारभ्य मातृरूपपर्यन्तं बहुविधरूपं धृत्वा समाजस्य कल्याणे संलग्ना भवति। वस्तुतस्तु नारी पूजनीया अस्ति, अस्मिन् विषये मनुनोक्तम्–

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफ़ला: क्रियाः।[1]

इदानीं विचार्य्यते यत् नार्यः संस्कृतज्ञाः भवेयुः चेत् सा कीदृशी स्वगृहस्य प्रबन्धे भूमिका निर्वाह्यति।

**भक्ष्याभक्ष्ययोः संस्कृतविदुषीणां विचार**

नारी संस्कृतविदुषी (संस्कृतज्ञा) भवेच्चेत् सा गृहप्रबन्धे कथं परिवर्तनमानयतुं शक्नोति इति प्रदर्श्यते। सर्वादौ सा भोजनसिद्धौ स्वज्ञानैः परिवर्तनमानयति। स्वस्थशरीरस्य कृते स्वस्थभोजनस्य सेवनम् अनिवार्यं वर्तते, किन्तु केन पदार्थेन स्वास्थ्यहानिः भवितुं शक्यते तस्य चिन्तनमत्यावश्यकम्। भोजनाय किं पदार्थं भक्ष्यमथ च किमभक्ष्यमस्ति इति ज्ञानं संस्कृतविदुषी सहजतया कर्तुमर्हति यतो हि अस्माकं शास्त्रेषु भक्ष्याभक्ष्ययोः विषये बहुचर्चा प्राप्यते, यदि नारी संस्कृतविदुषी भविष्यति चेत् सा स्वविवेकेन स्वस्थभोजनं पचेत्।

**शास्त्रेषु भक्ष्याभक्ष्ययोः विचारः**

अभक्ष्यभोजनप्रसङ्गे आपस्तम्बस्य मतमस्ति यत् हत्वा मासं न भक्षयेत्। दन्तैः मूलफलानि छित्वा न भक्षयेत्। सूतकगृहे भोजनं न अश्नियात्, केशकीटेभ्यः इषितमन्नं, काक-कुक्कुट संस्पृष्टमन्नं, पदाभ्यां स्पृष्टमन्नं, वाससः स्पृष्टमन्नम् अभोज्यमस्ति। मांसाहारभोजनान्तर्गते पशूनाम् मासं प्रसङ्गे धर्मशास्त्रकारैः कथितं यत् पञ्चनखानाम् पशूनाम् मांसं न भक्ष्यम् एवमेव अश्वस्य, उष्ट्रस्य, गवयस्य ग्राम्यशूकरस्य मांसम् अभोज्यमस्ति। पक्षिषु कुक्कुटस्य, प्लवस्य, हंसस्य, चक्रवाकस्य, सुपर्णस्य च मांसम् अभक्ष्यमस्ति। भगवान् मनुः गृहस्थानां कृते पञ्चसुनाः अपि उच्यते –

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।[2] अर्थात्

गृहस्थानां कृते एतेषां चुल्ली-उद्वाहनी, पेषणी, उपस्करः, कण्डनी, उद्कुम्भः इति हिंसास्थानानि सन्ति।

पर्यावरणसंरक्षणे संस्कृतविदुषीणां भूमिका-

गृहस्थजनानां लाभाय यादृशमुत्तमभोजनस्य महत्त्वं वर्तते तादृशमेव महत्त्वमुत्तमपर्यावरणस्यापि भवति, अस्मिन् क्षेत्रेऽपि संस्कृतविदुषी कीदृशी भूमिका निर्वहति इति विचार्य्यते। अस्माकं संस्कृतसाहित्यं प्रकृतिवर्णने अथ च

तत्संरक्षणे सर्वाग्रेऽस्ति । यथा वयं दृष्टुं शक्नुमः यत् शकुन्तलायाः पशु-लता-वृक्षान् प्रति कीदृशः रागोऽस्ति।

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।[3]

साम्प्रतिके काले पर्यावरणसंरक्षणमस्मत्कृते अत्यन्तगहनविषयोऽस्ति यतो हि अस्माकं दिल्लीनगरे अपि पर्यावरणं प्रदूषणेन ग्रस्तोऽस्ति, अतः यदि नारी संस्कृतविदुषी भवेत् तर्हि सा पर्यावरणस्य महत्त्वमवगच्छति एवञ्च संरक्षणायोपयुक्तकार्याणि अपि करिष्यति।

स्वस्थशरीरस्य परिपालने संस्कृतविदुषीणां योगदानम् –

साम्प्रतिककाले 'Fit India Movement' प्रचलति । स्वास्थ्यम् एव सम्पन्नतायाः विशिष्टः पन्था इत्यपि मन्यन्ते। उक्तमपि आचार्यैः– 'शरीरमाद्यं खलु धर्मसाधनम् ।[4] सत्यमेवेदं स्वस्थशरीरमेव अस्मान् विघ्नं विना सत्कार्याणि प्रति नयति। संस्कृतविदुषी नित्यकर्म, नैमित्तिककर्म, ध्यानं, योगश्च सम्यग्रूपेण परिपालयितुं शक्नोति यतो हि एषां कृते यस्य ज्ञानस्यापेक्षा वर्तते तत्सर्वं संस्कृते सन्निहितमस्ति । अतः संस्कृतविदुषी एषु क्षेत्रेषु सम्यक् परिपालनं कर्तुं शक्नुवन्ति । यथा अस्माकं स्मृत्यादिग्रन्थेषु नित्यनैमित्तिककर्माणां विशद्व्याख्यानमुपलभ्यते । पातञ्जलयोगसूत्रे स्वस्थशरीरस्य कृते नियामाः निर्धार्यते। 'योगश्चित्तवृत्तिनिरोधः।[5] योगस्य अष्टाङ्गाः सन्ति – 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि'।[6]

**मातृरूपे संस्कृतविदुषी-**

याः खलु नार्यः सम्यग्रूपेण संस्कृतं जानन्ति ते सम्यक् आचरति यतो हि संस्कृतज्ञाः सुसंस्कृतमाचरन्ति। लोके वयं पश्यामः यत् ये जनाः यत् पठन्ति, शृण्वन्ति, पश्यन्ति आमनन्ति च ते तथैव आचरन्ति. तर्हि अस्माकं मोक्षकामनायै लिखितानि शास्त्राणि, परित्राणाय वर्णिताः कथाः अस्मान् असदः सत् प्रतिं नयन्ति। अनेन सिद्धेयं वार्ता यत् प्रायः सर्वाः संस्कृतविदुष्यः सुसंस्कृतव्यवहरन्ति। यदि सा संस्कृतविदुषी मातृरूपेण सर्वे प्राप्स्यामः चेत् अस्माकं राष्ट्रस्य अथ च संस्कृतेः उत्तमा गतिर्भविष्यति। संस्कृतविदुषी यदि मातृरूपे भविष्यति तर्हि सा स्वबालान् पापात् गोपायति, सत्यस्य मार्गं प्रति प्रेरयति। मातुः विषये लिखितमपि अस्ति-

नास्ति मातृसमा छाया, नास्ति मातृसमा गतिः।
नास्ति मातृसमं त्राण, नास्ति मातृसमा प्रिया ॥[7]
अपि च –मातृ देवो भव।[8]

**अपि च स्मृतिवचनम् अस्ति** –

उपाध्यायन्दशाचार्य आचार्याणां शतं पिता।
सहस्रं तु पितृन्माता गौरवेणातिरिच्यते ॥[9]

अर्थ: – एकोऽचार्यो गौरवं दशोपाध्यायात् अधिकमस्ति | पिता शताचार्यादुत्तमो वर्तते, किन्तु एकैव माता सहस्रपिताभिः श्रेष्ठा विद्यते |

**गृहस्थाश्रमे संस्कृतविदुषीणां भूमिका**

'शतायुर्वै पुरुषः' आश्रमाः चत्वारः। ते च १. ब्रह्मचर्याश्रमः, २. गृहस्थाश्रमः, ३. वानप्रस्थाश्रमः, ४. सन्यासाश्रमश्चेति । समावर्तनसंस्कारानन्तरं ब्राह्मणादिवर्णाः गुरुकुलात् प्रत्यावर्तनं कुर्वन्ति । तदा ते विवाहसंस्कारेण संस्कारिताः सन्तः गृहस्ताश्रमे प्रविशन्ति । गृहस्य निर्माणं वैवाहिकदम्पत्तिभ्यां सहयोगेन भवति। अपि च गृहस्थाश्रमे प्रवेशाय विवाहसंसाकरस्य महत्त्वो वर्तते। धर्मशास्त्रे मुख्यतः विवाहस्य अष्टभेदाः प्राप्यन्ते । ते च ब्रह्मः, दैवः, आर्षः, प्राजापत्यः, आसुरः, गान्धर्वः, राक्षसः, पैशाचः । उक्तं च मनुना –

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ॥[10]

साम्प्रतिककाले एतानि सर्वाणि विवाहभेदाः तु न प्रचलिताः, किन्तु विवाहस्य महत्त्वम् अद्वितीयम् एव। अस्मिन् समाजे प्राजापत्यः अथ च गान्धर्वः विवाहः एव स्वीक्रियते। एतेषां विवाहानां महत्त्वं संस्कृतविदुषीस्वपरिवारे समाजे च दातुं शक्यते। विवाहानन्तरं गर्भाधानात् आरभ्य बहवः संस्काराः विद्यते । धर्मशास्त्रोक्तसंस्कारविषयः बृहत्वर्तते । मानवानां जीवने संस्कारस्य अस्तित्वमादिकालतः प्रचलति । जन्मतः मृत्युपर्यन्तं षोडशसंस्काराः विद्यन्ते अपि च गौतमधर्मसूत्रे तु चत्वारिंशत् संस्काराणामुल्लेखो वर्तते। संस्कारेण बालकस्य स्वास्थ्यवर्धनं जायते, अस्य पृष्ठे वैज्ञानिकं कारणं विद्यते । संस्कारस्य शास्त्रीयं महत्वं तु अस्ति एव अपितु संस्कारस्य वैज्ञानिकमहत्वमपि जायते। उदाहरणार्थे –

- **शास्त्राधारेण अन्नप्राशनस्य परिलोचनम्** – रक्त-भ्रुणात् उत्पन्नदोषदूरीकरणाय अन्नप्राशनं क्रियते । पारस्करगृह्यसूत्रेण अन्नप्राशनस्य विधिः वर्तते – 'षष्ठे मासेऽन्नप्राशनम्'।[11] जन्मतः षष्ठे मासे कुमारस्यान्नप्राशनाख्यं कर्म कुर्यात् ।
- **वैज्ञानिकदृष्ट्या अन्नप्राशनस्य महत्वम्**– नवजातशिशोः जलेन (diarrhoea) कुपोषणं भवितुं शक्यते । बालकः स्तनपानेनैव अशीति-प्रतिशतं जलं प्राप्नोति । अर्थात् षड्मासपर्यन्तं बालकेन स्तनपानमेव स्वस्थहिताय करणीयम् । अनेन कारणेन बालकस्य पूर्णविकासः अपि भविष्यति। ग्रीष्मेऽपि बालकाय जलस्य आवश्यकता न वर्तते अथ च तस्य कृते स्तनपानेव पर्याप्तम् ।

यदि संस्कृतविदुषी संस्कारैः परिचिता अस्ति तर्हि सा स्वबालकमथ च अन्यानपि संस्कारस्य महत्ता वक्तुं शक्नोति ।

**गृहस्थीनां कृते दैनिकक्रिया**

विवाहानन्तरं गृहस्थीनां कृते विभिन्नकर्तव्याः निर्धारिताः सन्ति । गृहस्थः सर्वेषामाश्रमाणां जनकः पालकः धर्मकर्मसंरक्षकश्च भवति । भगवता मनुना गृहस्थं प्रशंसयन प्रतिपादितं यत् –

यथावायुं समाश्रित्यः वर्तन्ते सर्व जन्तवः ।
तथा गृस्थमाश्रित्यः वर्तन्ते सर्वाश्रमाः ।[12]

गृहस्थाश्रमे तिष्ठन् गृहस्थः शास्त्रोक्तविधिना गृहस्थ परिपालयेत् । द्विजः मलमुत्रादि त्यागं कृत्वा विध्यनुसारं शौचसम्पन्नो भूत्वा दन्तधावनञ्च कृत्वा स्नानादीन् समाप्य प्रातर्सन्ध्योपासनादि कार्यं कुर्यात् । सन्ध्योपासनानन्तरम् अग्नौ अग्निहोत्रं हुत्वा ध्यानपूर्वकं सूर्यदैवमन्त्रं जपेत् । गृहस्थः सर्वदेवेभ्यः भृतेभ्यः भुक्त्वा भोजनं कुर्यात् इति शास्त्रसम्मतम् । बालपितृगृहनिवासिनिकन्या-वृद्ध-गर्भिणी-रोगग्रस्तकन्या-अतिथि-भृत्याश्च भोजयित्वा दम्पत्तिः शेषभागं भुज्यते । अत्र दायित्वसम्पन्नस्य गृहस्थस्य सर्वेषां कृते भरणकर्तव्यत्वं बोध्यते ।

पञ्चमहायज्ञाः -

वस्तुतः गृहस्थाश्रमे पञ्चमहायज्ञानां विधिवदनुष्ठानं कृत्वा जातपुत्रः अग्न्याधानादिकं श्रौतकर्म स्थालिपाकादिकं स्मार्तकर्म च करोति । उक्तं च मनुना पञ्चमहायज्ञानां विषये –

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो देवौ बलिर्भुता नृयज्ञोऽतिथिपूजनम् ॥[13]

विश्वदेवादिबलिकर्मतर्पणश्राद्धादिस्वधातर्पणं होमं वेदाध्ययनरूपकं स्वाध्यायम् अतिथिसत्कारञ्च एते भूतपितृदेवब्रह्ममनुष्ययज्ञाः पञ्चमहायज्ञाः भवन्ति। एतेषां पञ्चमहायज्ञानामनुष्ठानं यथोक्तरीत्या कुर्यात् । वैश्वदेवहोमानन्तरम् अवशिष्टमन्नं भूतेभ्यः बलिरूपेण दध्यात् । श्व-चाण्डाल-काकेभ्यः भूमौ अन्नं निक्षिपेत् । प्रतिदिनं पितृपुरुषेभ्यः अतिथिभ्यः च यथाशक्तिमन्नं समर्पयेत् । अन्नभावे जलं दध्यात् । एकस्मिन्नेव समये बहवः अतिथयः यदा समागच्छन्ति तदानिं वर्णक्रमेण ब्राह्मणादीन् अतिथीन् यथाशक्तिं भोजयेत् । सन्ध्याकाले यदि कश्चित् अतिथिः आगच्छति तमपि न निराशयेत् । अपि च अन्नादिनामभावे सति मधुरेण वचनेन तोषयित्वा भूमौ तृणासनादीन् विस्तीर्य उपविष्टुं च उक्त्वा पादप्रक्षालनपाननिमित्तञ्च जलं प्रदाय अतिथि सत्कारं कुर्यात् । अतिथिविषये जिज्ञासा जायते यत् कः अतिथिः भवति । अस्मिन् विषये पराशरुच्यते यः दुराध्वोपगतं ग्रामान्तरादागतम्, आन्तं क्षत-तृष्णा परिपीडितम्, वैश्वदेव उपस्थितम् अतिथि कथ्यते । उक्तं च पराशरः -

दुराच्चोपगतं क्षान्तं वैश्वदेवे उपस्थितम् ।
अतिथिं तं विजानीयान्नातिथिपूर्वमागतः ॥[14]

पुनः पराशरः उच्यते ये जनाः अतिथिसत्कारः न कुर्वन्ति तथा च विना सत्कारं भोजनं खादन्ति ते नरके च पतन्ति ।

**सारांश**

संस्कृतविदुषीणां भूमिका अस्माकं जगति अतीव विशिष्टा वर्तते । यदि नारी संस्कृतज्ञा वर्तते तर्हि सा संस्कृतग्रन्थोक्तज्ञानाधारेण समाजस्य अथ च तस्याः गृहस्य कल्याणं सुधारञ्च कर्तुं शक्नोति । यथा वयं जानीमः यत्संस्कृतस्य समाजस्य विभिन्नक्षेत्रेषु कियत् महत्त्वं विद्यते । जगतः कल्याणाय संस्कृतविदुषी बहुषु क्षेत्रेषु योगदानं प्रदातुं शक्नोति । यथा– समाजिकक्षेत्रे, राजनैतिकक्षेत्रे,

संयुक्तपरिवारसंरक्षणे, विश्वबन्धुत्वसंरक्षणे, पर्यावरणसंरक्षणे आदि च बहुषु क्षेत्रेषु नारी अद्वितीया भूमिका निर्वहति। यदि कापि नारी संस्कृतमर्मज्ञा भवेत् तर्हि तस्याः अथ च तस्याः कुटुम्बस्य कल्याणमपि भवितुमर्हति।

**संदर्भग्रन्थसूची**

1. मनुस्मृतिः (३/५६ ) auth. मन्वर्थमुक्तावलीसहित कुल्लुकभट्टकृत. - वाराणसी : चौखम्बासंस्कृतसीरीज् , १९७० .
2. मनुस्मृतिः (३,६८) auth. मन्वर्थमुक्तावलीसहित कुल्लुकभट्टकृत. - वाराणसी : चौखम्बासंस्कृतसीरीज् , १९७० .
3. अभिज्ञान शाकुन्तलम् (अ. ४ श्लो. ९) auth. कालिदास महाकवि. - नई दिल्ली : चौखम्बा पब्लिशिंग हाऊस, २०११
4. कुमारसम्भवम् (५.३३)
5. योगदर्शनम् (समाधिपादः, सूत्र-२) auth. पतञ्जलि महर्षि. - गुजरात : दर्शन योग महाविद्यालय . - Vol. ३ .
6. योगदर्शनम् (साधनपादः, सूत्र-२९) auth. पतञ्जलि महर्षि. - गुजरात : दर्शन योग महाविद्यालय . - Vol. ३ .
7. स्कन्धपुराणम् (६,१०३-४)
8. तैत्तिरीयोपनिषदं (१/११ ) auth. मोतीललबनारसीदास. - दिल्ली : [s.n.], प्रथमसंस्करणम्-१९७० .
9. मनुस्मृतिः (२/१४५) auth. मन्वर्थमुक्तावलीसहित कुल्लुकभट्टकृत. - वाराणसी : चौखम्बासंस्कृतसीरीज् , १९७० .
10. मनुस्मृतिः (३/२१) auth. मन्वर्थमुक्तावलीसहित कुल्लुकभट्टकृत. - वाराणसी : चौखम्बासंस्कृतसीरीज् , १९७० .
11. पारस्करगृह्यसूत्रम् (१,१९,१) auth. हरिहरभाष्यसहितम्. - मुम्बई : लक्ष्मीवेंकटेश्वरप्रेस , १९३८ .
12. मनुस्मृतिः (३/७७) auth. मन्वर्थमुक्तावलीसहित कुल्लुकभट्टकृत. - वाराणसी : चौखम्बासंस्कृतसीरीज् , १९७० .
13. मनुस्मृतिः (३/१० ) auth. मन्वर्थमुक्तावलीसहित कुल्लुकभट्टकृत. - वाराणसी : चौखम्बासंस्कृतसीरीज् , १९७० .
14. पराशरस्मृतिः (१/४१) auth. पराशर. - [s.l.] : मुंबई संस्कृतमाला , १९९१ .

www.ijpd.co.in